निःशेषदोषजनितज्वरशेषजन्मा
स्यात् कर्णमूलविषये श्वयथुर्व्यथा च।
कण्ठग्रहो बधिरताश्वसनप्रलाप-
प्रस्वेदमोहदहनानि च कर्णकाख्ये॥ १२॥
कण्ठः शूकशतावरुद्ध इवदति श्वासःप्रलापोऽरुचि-
र्दाहो देहरुजा तृषापि च हनुस्तम्भः शिरोऽर्त्तिस्तथा।
मोहो वेपथुना सहेति सकलं लिङ्गं त्रिदोषज्वरे
यत्र स्यात् स हि कण्ठकुञ्ज उदितः प्राज्ञैश्चिकित्सावुधैः॥ १३॥ * ॥
सन्धिगस्तेषु धाध्यः स्यात्तन्द्रिकश्चित्तविभ्रमः।
कर्णको जिह्वकः कण्ठकुञ्जः पञ्चापि कष्टकाः॥
रुग्दाहस्त्वतिकष्टेन संसाध्यस्तेषु भाषितः।
रक्तष्ठीवी भुग्ननेत्रः शीतगात्रः प्रलापकः।
अभिन्यासोऽन्तकश्चैते षड़साध्याः प्रकीर्त्तिताः॥"*॥

अथ तन्त्रान्तरे। वातोल्वणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां कुम्भीपाकादीनि त्रयोदश नामान्तराणि लक्षणान्तराणि चाह।
"कुम्भीपाकः प्रोर्णुनावः प्रलापी
ह्यन्तर्दाहो दण्डपातोऽन्तकश्च।
एणीदाहश्चाथ हारिद्रसंज्ञो
भेदा एते सन्निपातज्वरस्य॥
अजघोषभूतहासौ यन्त्रापीड़श्च संन्यासः।
संशोषी च विशेषास्तस्यैवोक्तास्त्रयोदश च॥"
अथैषां लक्षणानि।
"घोणाविवरभ्रश्यद्बहुशोणासितनीललोहितं सार्त्तिं।
विलुठन् मस्तकमभितः कुम्भीपाकेन पीड़ितं विद्यात्॥
उत्क्षिप्य यः स्वमङ्गं क्षिपत्यधस्तान्नितान्तमुच्छ्वसिति।
तं प्रोर्णुनावजुष्टं विचित्रकष्टं विजानीयात्॥
स्वेदभ्रमाङ्गपीड़ा कम्पो दवथुर्वमी व्यथा कण्ठे
गात्रस्य गुर्व्वतीदं प्रलापिजुष्टस्य जायते लिङ्गम्॥
अन्तर्दाहः शैत्यं बहिश्च यस्या विशेषतः श्वासः
अङ्गमिव दग्धकल्पं सोऽन्तर्दाहाहितः कथितः॥
नक्तं दिवा न निद्रामुपैति गृह्णाति मूढ़धीर्नभसः।
उत्थाय दण्डपाते भ्रमातुरः सर्व्वतो भ्रमति॥"
नभसो गृह्णाति आकाशात् किञ्चिद्ग्रहीतुं करौ प्रसारयति इत्यर्थः।
"संपूर्य्यते शरीरं ग्रन्थिभिरभितस्तथोदरं मरुता
श्वासातुरस्य सततं विचेतनस्यान्तकार्त्तस्य॥
परिधावतीव गात्रे वक्पात्रे भुजगपतगहरिणगणाः।
वेपथुमतः सदाहस्यैणीदाहज्वरार्त्तस्य॥"
वक्पात्रे पीड़ाभाजने। गात्रस्य विशेषणमेतत्
"यस्यातिपीतमङ्गं नयने सुतरामलं ततोऽप्यधिकम्।
दाहोऽतिशीतता बहिरस्य स हारिद्रको ज्ञेयः॥
छगलकशरीरगन्धः स्तब्धवजावाग्निरुद्धगलरन्ध्रः।
अजघोषसन्निपातादातामाक्षः पुमान् भवति॥
शब्दादीनधिगच्छति न स्वान्विषयान् यदीन्द्रियग्रामः।
हसति प्रलपति पठञ्च स ज्ञेयो भूतहासार्त्तः॥
येन मुहुर्ज्वरवेगादयन्त्रेणैवावपीड्यते गात्रम्।
रक्तं पीतञ्च वमेत् यन्त्रापीड़ः स विज्ञेयः॥
अतिसरति वमति कूजति गात्राण्यभितश्चिरं नरः क्षिपति।
स न्याससन्निपाते प्रलपति भुग्नाक्षिमण्डलो भवति॥
मेचकवपुरतिमेचकलोचनयुगलोऽवलो मलोत्सर्गात्।
संशोषिणि सितपिड़कामण्डलयुक्तो ज्वरे भवति
नारायण एव भिषग्भेषजमेतेषु जाह्नवीनीरम्।
नैरुज्यहेतुरेको नित्यं मृत्युञ्जयोऽध्येयः॥"*॥
अथासाध्यसन्निपातज्वरस्य लक्षणमाह।
"सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः।
शोथः संजायते तेन कश्चिदेव प्रमुच्यते॥"
सुदारुणः मारकत्वात् यतस्तेन शोथेन कश्चिदेव प्रमुच्यते। कोऽपि जीवितं त्यजति इत्यर्थः।
"सन्निपातज्वरान् कष्टानसाध्यानपरे जगुः।
दोषे विबद्धे नष्टेऽग्नौ सर्व्वसम्पूर्णलक्षणः।
सन्निपातज्वरोऽसाध्यः कष्टसाध्यस्ततोऽन्यथा॥"
दोषे पित्तकफे। विबद्धे अपक्वे सर्व्वसम्पूर्णलक्षणः सर्व्वाणि दाहशीतादीनि सम्पूर्णानि अन्यूनानि प्रौढ़ानीति यावत् लक्षणानि यस्य सः। ततोऽन्यथा दोषे पक्वे अग्नौ दीप्ते स्वल्पलक्षणकः कष्टसाध्य इत्यर्थः॥ * ॥ * ॥
अथ सामान्यसन्निपातज्वरस्य चिकित्सा।
"सन्निपातार्णवे मग्नं योऽभ्युद्धरति मानवम्।
कस्तेन न कृतो धर्म्मः काञ्च पूजां न सोऽर्हति॥
मृत्युना सह योद्धव्यं सन्निपातं चिकित्सता।
यश्च तत्र भवेज्जेता स जेतामयसङ्कुले॥
श्लेष्मनिग्रहमेवादौ कुर्य्याद्दाधौ त्रिदोषजे।
निरस्ते श्लेष्मणि ह्यस्य स्रोतःसुद्घाटितेषु च।
लाघवं जायते सद्यस्तृष्णा चैवोपशाम्यति॥"*॥
भेड़ोऽप्याह।
"सन्निपातज्वरे पूर्व्वं कुर्य्यादामकफापहम्।
पश्चात् श्लेष्मणि संक्षीणे शमयेत् पित्तमारुतौ॥" इति॥ * ॥
ननु तन्त्रान्तरे प्रथमं पित्तस्य प्रतिक्रिया प्रोक्ता यथा,—
"शमयेत् पित्तमेवादौ ज्वरेषु समवायिषु।
दुर्न्निवारतरं तद्धि ज्वरार्त्तेषु विशेषतः॥" इति
अन्यत्रापि।
"समवाये त्रिदोषाणां पूर्व्वं पित्तमुपाचरेत्।
ज्वरे चैवातिसारे च सर्व्वत्रान्यत्र मारुतः॥" इति॥
तथान्यत्र प्रथमं वायोः प्रतिक्रिया प्रोक्ता।
यथा,—
"वातस्यानुजयेत् पित्तं पित्तस्यानुजयेत् कफम्।" इति॥ * ॥
तत्र व्यवस्थामाह तन्त्रान्तरे।
"ज्वरे त्रिदोषजे सामे शमयेत् प्रथमं कफम्।
जीर्य्यत्यामे जयेत् पित्तं निरामे त्वनिलं जयेत्॥
इति। प्रथममिति स्थानत्रयेऽपि सम्बध्यते।
अन्ये त्विति समादधते।
"त्रयाणां वा जयेत् पूर्व्वं तं यः स्याद्बलवत्तरः।" इति।
तथा च।
"संसर्गे यो गरीयान् स्यादुपक्रम्यः स वै भवेत्
शेषदोषाविरोधेन सन्निपाते तथैव च॥" इति॥
संसर्गे दोषद्वयसंसर्गे। गरीयान् बलवत्तरः।
"अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात्॥
क्रियां साधारणीं तत्र विदधीत चिकित्सकः॥
लङ्घनं वालुकास्वेदो नस्यं निष्ठीवनं तथा।
अवलेहोऽञ्जनञ्चैव प्राक् प्रयोज्यं त्रिदोषजे॥"
ज्वर इति शेषः॥ * ॥ ननु।
"क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत्
पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो हितः॥"
इति वचनेन क्रियासङ्करस्य निषिद्धत्वात् कथमत्र नस्यनिष्ठीवनावलेहाञ्जनानि युगपद्विधीयन्ते इत्याशङ्कायामाह।
"क्रियाभिस्तुल्यरूपाभिः क्रियासाङ्कर्य्यमिष्यते।
भिन्नरूपतयैतास्तु नहि कुर्व्वन्ति दूषणम्॥"*॥
तत्र लङ्घनस्य अवधिमाह।
"त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा।
लङ्घनं सन्निपातेषु कुर्य्याद्वारोग्यदर्शनात्॥"
लङ्घने त्रिरात्रादिविकल्प उल्वणवाताद्यपेक्षया दोषाणां शीघ्रमध्यमन्दशक्तिकत्वात् व्याधिस्वभावाच्च। आरोग्यदर्शनात् इति यावदरोगतादर्शनं स्यात्तावद्वा लङ्घनं कुर्य्यात्। एतेन त्रिरात्राद्यवधेरनियतत्वं सूचितम्। अतएव सुश्रुतः प्राह।
"सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा।
पुनर्घोरतरो भूत्वा प्रशमं यान्ति हन्ति वा॥"
घोरतर इति घोरः स्वभावादेव तदा घोरतरो भूत्वेति॥ *॥ हननप्रशमनयोः कारणमाह।
"पित्तकफानिलवृद्ध्या दशदिवसद्वादशाहसप्ताहात्।
हन्ति विमुञ्चत्यथवा त्रिदोषजो धातुमलपाकात्॥"
त्रिदोषजो ज्वर इति शेषः। धातुमलपाकात् धातुपाकाद्धन्ति मलपाकाद्विमुञ्चतीत्यर्थः।
धातुमलपाके प्राक्तनकर्म्मैव हेतुः। तत्र यदि जीवनसंवर्द्धकं कर्म्मास्ति तदा मलपाकोऽन्यथा धातुपाकः। स च रसादिशुक्रान्तधातूनां पाको बोद्धव्यः॥*॥ तत्र धातुपाकस्य लक्षणमाह।
"निद्रानाशो हृदि स्तम्भो विष्टम्भो गौरवारुची।
अरतिर्बलहानिश्च धातूनां पाकलक्षणम्॥"
विष्टम्भ उदरस्य। गौरवं गात्राणाम्। अन्यच्च।